

# निर्वाण षट्कम्-शिवोहं शिवोहं, शिवोहं शिवोहं,

https://www.chalisa.online

|| निर्वाण षट्कम् ||

शिवोहं शिवोहं, शिवोहं शिवोहं, शिवोहं शिवोहं
मनो बुध्यहंकार चित्तानि नाहं
न च श्रोत्र जिह्वा न च घ्राणनेत्रं ।
न च व्योम भूमिर्-न तेजो न वायुः
चिदानंद रूपः शिवोहं शिवोहं ॥ 1 ॥
अहं प्राण संज्ञो न वैपंच वायुः
न वा सप्तधातुर्-न वा पंच कोशाः ।
नवाक्पाणि पादौ न चोपस्थ पायू
चिदानंद रूपः शिवोहं शिवोहं ॥ 2 ॥
न मे द्वेषरागौ न मे लोभमोहो
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः
चिदानंद रूपः शिवोहं शिवोहं ॥ 3 ॥
न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानंद रूपः शिवोहं शिवोहं ॥ 4 ॥
अहं निर्विकल्पो निराकार रूपो
विभूत्वाच्च सर्वत्र सर्वेंद्रियाणाम् ।
न वा बंधनं नैव मुक्ति न बंधः ।
चिदानंद रूपः शिवोहं शिवोहं ॥ 5 ॥
न मृत्युर्-न शंका न मे जाति भेदः
पिता नैव मे नैव माता न जन्म ।
न बंधुर्-न मित्रं गुरुर्नैव शिष्यः
चिदानंद रूपः शिवोहं शिवोहं ॥ 6 ॥
शिवोहं शिवोहं, शिवोहं शिवोहं, शिवोहं शिवोहं

|| https://www.chalisa.online ||